# M.A. (Previous) EXAMINATION, 2018

## SANSKRIT

### First Paper : ( वैदिक वाङ्मयम )

**Time Allowed : Three Hours** **Maximum Marks : 100**

सर्वे प्रश्नाः समाधेयाः। परीक्षार्थिभिः समेषां प्रश्नानामुत्तराणि यथाशक्यं संस्कृतभाषायामेव देयानि। पाठ्यग्रन्थदिशा एव समुत्तर लेख्यम्।

1. अधोलिखितेषु मन्त्रेषु द्वयोः व्याख्या समाधेया–

(क) अग्निनाग्निः समिध्यते कविर्गृहपतिर्युवा।
हव्यवाड् जुह्वास्यः।।

(ख) प्र पर्वतानामुशती उपस्थादश्वे इव विषिते हासमाने।
गावेव शुभ्रे मातरा रिहाणे विपाछुतुद्री पयसा जवेते।।

(ग) यूयं हि देवीर्ऋतयुग्भिरश्वैः परिप्रयाथ भुवनानि सद्यः।
प्रबोधयन्तीरुषसः ससन्तं द्विपाच्चतुष्पाच्चरथाय जीवम्।।

(घ) त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत्पुनः।
ततो विष्वङ्व्यक्रामत्साशनानशने अभि।। 7+7

2. एकस्य सूक्तस्य सारो लेखनीयः–

(क) नासदीयसूक्तम्

(ख) अश्विनौ सूक्तम्

(ग) रुद्रसूक्तम्। 6

3. अधोलिखितेषु मन्त्रेषु द्वयोः व्याख्या कार्या–

(क) येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः।
यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु।।

(ख) अश्विना त्वाग्रे मित्रावरुणोभा विश्वे देवा मरुतस्त्वा ह्वयन्तु।
अधा मनो वसुदेयाय कृणुष्व ततो न उग्रो वि भजा वसूनि।।

(ग) इमा आपः प्र भराम्ययक्ष्मा यक्ष्मनाशनीः।
गृहानुप प्र सीदाम्यमृतेन सहाग्निना।।

(घ) सत्यं बृहदृतमुग्रं दीक्षा तपो ब्रह्म यज्ञः पृथिवीं धारयन्ति।
सा नो भूतस्य भव्यस्य पत्न्युरुं लोकं पृथिवी नः कृणोतु।। 7+7

4. एकस्य सूक्तस्य सारो लेख्यः–

(क) उच्छिष्टब्रह्म सूक्तम्।

(ख) पृथिवीसूक्तम्। 6

https://universitynews.in/

5. कस्यचिदेकस्य मन्त्रस्य व्याख्या संस्कृतभाषया कार्या–

शान्तसंकल्पः सुमना यथा स्याद्वीतमन्युर्गौतमो मभिमृत्यो।

त्वत्प्रसृष्टं माभिवदेत्प्रतीत एतत्त्रयाणां प्रथमं वरं वृणे।।

अथवा

अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितम्मन्यमानाः।

दन्द्रयमाणाः परियन्ति मूढा अन्धेनेव नीयमाना यथान्धाः।। 10

6. केषाञ्चित् चतुर्णां प्रश्नानामुत्तराणि संस्कृतेन लिखत–

(क) नचिकेता कस्य पुत्रः आसीत् ? स नचिकेतसं कस्मै अददात्?

(ख) अयमात्मा केन लभ्यः।

(ग) इन्द्रियाणि कस्य वश्यानि भवन्ति ?

(घ) प्रेयमार्गः कीदृशः भवति ?

(ङ) सर्वे वेदाः किं पदम् आमनन्ति ?

(च) प्रसन्नः यमः नचिकेतसे किं वरं ददाति ?

(छ) नचिकेता तृतीयवरेण किम् अयाचत् ?

(ज) अनन्दान् लोकान् कः गच्छति ? 2½+2½+2½+2½

7. अधोलिखितेषु अंशेषु द्वयोः व्याख्या विधेया–

(क) अनर्थकाः हि मन्त्राः इति कौत्सः।

(ख) षड्भावविकाराः भवन्ति इति वार्ष्यायणिः।

(ग) भावप्रधानम् आख्यातं सत्त्वप्रधानानि नामानि।

(घ) इन्द्रियनित्यं वचनमौदुम्बरायणः। 5+5

8. केषाञ्चित् पञ्चपदानां निर्वचनानि लिखत–

(क) निघण्टुः

(ख) अध्वर्युः

(ग) दक्षिणा

(घ) वीरः

(ङ) चित्तम्

(च) पुरुषः

(छ) मघोनी

(ज) आचार्यः

(झ) छवः

(ञ) शाखा 2+2+2+2+2

9. टिप्पणीद्वयं लिखत–

(क) वेदानां रचनाकालः।

(ख) उपनिषदाम् आध्यात्मिकमहत्ता।

(ग) ब्राह्मणग्रन्थानां विषयवस्तु।

(घ) यजुर्वेदस्य प्रतिपाद्यः। 10+10

https://universitynews.in/